द्विकोषः ॥ (भदन्तः प्रव्रजितः । इत्युणादौ । ३ । १३० । सूत्रव्याख्यायां उज्ज्वलदत्तः । यथा, कथासरित्सागरे । ४६ । १७८ ।
"तत्रान्विष्य यथावत् तं भदन्तमभिगम्य च ।
परिचर्य्यापरो भक्त्या त्रीणि वर्षाण्यशेषतः ॥")

भदाकः, पुं, क्ली, (भन्दते इति । भदि+"पिनाकादयश्च ।" उणा० । ४ । १५ । इति आकः । नलोपश्च ।) मङ्गलम् । इत्युणादिकोषः ॥

भद्रं, क्ली, (भन्दते इति । भदि कल्याणे+"ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रेति ।" उणा० । २ । २८ । इति रन् । निपात्यते च ।) मङ्गलम् । (यथा, ऋग्वेदे । २ । २६ । २ ।
"यजस्व वीर ! प्रविहि मनायतो भद्रं मनः
कृणुष्व वृत्रतूर्य्ये ॥"
यथा च कामन्दकीयनीतिसारे । १३ । १२ ।
"किरीटमणिचित्रेषु मूर्द्धसु न्यायसारिषु ।
नाक्रम्य विद्विषां प्रायः पुरुषो भद्रमश्नुते ॥")
मुस्तम् । काञ्चनम् । इति मेदिनी । रे, ७१ ॥

भद्रं, क्ली, स्त्री, (भदि+रन् निपात्यते च ।) करणविशेषः । इति मेदिनी । रे, ७२ ॥ तत्तु विष्टिभद्रात्वेन प्रसिद्धमशुभदम् । इति ज्योतिषम् ॥

भद्रः, पुं, (भन्दते इति भदि+रन् निपातितश्च ।) शिवः । खञ्जरीटः । वृषभः । कदम्बकः । करिजातिविशेषः । इति मेदिनी । रे, ७० ॥ नवमुक्तावलान्तर्गतजिनभेदः । रामचरः । सुमेरुः । इति हेमचन्द्रः ॥ स्नुही । इति राजनिर्घण्टः ॥ (चन्दनम् । तत्पर्य्यायो यथा,—
"श्रीखण्डं चन्दनं नस्त्री भद्रः श्रीस्तैलपर्णिकः ।
गन्धसारो मलयजस्तथा चन्द्रद्युतिश्च सः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) साध्यमौलिकानां पद्धतिविशेषः । यथा,—
विष्णुर्नागः खिलपिलगूत इन्द्रो गुप्तः पालो भद्रः ।
इति कुलाचार्य्यकारिका ॥ (वसुदेवस्य पुत्त्रभेदः । यथा, भागवते । ९ । २४ । ४७ ।
"सुभद्रो भद्रबाहुश्च दुर्म्मदो भद्र एव च ।
पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ॥"
सरोवरविशेषः । यथा, मत्स्यपुराणे ।११२।४६।
"अरुणोदं मानसञ्च सितोदं भद्रसंज्ञितम् ।
तेषामुपरि चत्वारि सरांसि च वनानि च ॥"
तृतीयमनोरुत्तमस्यान्तरे देवगणभेदे बहुवचनान्तोऽयम् । यथा, भागवते । ८ । १ । २४ ।
"वशिष्ठतनयाः सप्त ऋषयः प्रमदादयः ।
सत्या वेदश्रुता भद्रा देवा इन्द्रस्तु सत्यजित् ॥"
स्वायम्भुवमन्वन्तरे विष्णोर्द्दक्षिणागर्भजात तुषितनामकदेवगणभेदः । यथा, भागवते ।४।१।६-७।
"तां कामयानां भगवानुवाह यजुषां पतिः ।
तुष्टायां तोषमापन्नोऽजनयद्द्वादशात्मजान् ॥
तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिड़स्पतिः ॥
इध्मः कविर्विभुः स्वाह्नः सुदेवो रोचनो द्विषट् ॥"
पर्व्वतविशेषः । यथा, ब्रह्माण्डपुराणे । भुवनकोषे । ४० अध्याये ।
"अरुणः शिखिरीतश्च सको वैदूर्य्यपर्व्वतः ।
कपिलः पिङ्गलो भद्रः सुरसश्च महाचलः ॥"
एकादशद्वापरजातो महेश्वरस्य ऋषिमूर्त्त्यवतार विशेषः । यथा, ब्रह्माण्डे । २७ अध्याये ।
"एकादशद्वापरे तु व्यासस्तु त्रिवृषो यदा ।
तदाप्यहं भविष्यामि गङ्गाद्वारे युगान्तिके ॥
भद्रो नाम महातेजास्तत्रापि मम पुत्त्रकाः ।
भविष्यन्ति महात्मानो सुवृत्ता वेदपारगाः ॥")

भद्रः, त्रि, (भन्दते इति । भदि कल्याणे रन् । निपात्यते च ।) श्रेष्ठः । साधुः । इति मेदिनी । रे, ७२ ॥ (यथा, पञ्चतन्त्रे । १ । २६ ।
"भद्र ! करटक ! अयं तावदस्मत्स्वामी पिङ्गलक उदकग्रहणार्थं यमुनाकच्छमवतीर्य्य स्थितः ॥")

भद्रकं, क्ली, (भद्र+संज्ञायां स्वार्थे वा कन् ।) भद्रमुस्तकम् । इति रत्नमाला ॥ (देवदारुशब्देऽस्य विषयोऽभिहितः ॥) मनोज्ञे, त्रि । इति त्रिकाण्डशेषः ॥

भद्रकः, पुं, (भद्र+संज्ञायां कन् ।) देवदारुः । इति शब्दरत्नावली ॥

भद्रकण्टः, पुं, (भद्रः कण्टो यस्य ।) गोक्षुरः । इति राजनिर्घण्टः ॥

भद्रकाली, स्त्री, (भद्रा मङ्गलमयी चासौ काली चेति कर्म्मधारयः । यद्वा, भद्रं कल्याणं कालयतीति । भद्र+कर्म्मण्यण् ।" ३ । २ । १ । इति अण् । ङीप् ।) गन्धोली । कात्यायनी । इति मेदिनी । ले, १५८ । तस्या उत्पत्तिर्यथा,—
श्रीऔर्व्व उवाच ।
"शृणु त्वं नृपशार्दूल ! भद्रकाली यथा पुरा ।
प्रादुर्भूता महाभागा महिषेण सदैव तु ॥
महिषासुर एवासौ निद्रायां निशि पर्व्वते ।
स्वप्नं प्रददृशे वीरो दारुणं घोरदर्शनम् ॥
महामाया भद्रकाली छित्त्वा खड्गेन काशिरम् ।
पपौ तस्य च रक्तानि व्यादितास्यातिभीषणा ॥
ततः प्रातर्भययुतः स दैत्यो महिषासुरः ।
तामेव पूजयामास सुचिरं सानुगस्तदा ॥
आराधिता तदा देवी महिषेणासुरेण वै ।
प्रादुर्भूता भद्रकाली भुजैः षोड़शभिर्युता ॥
ततः प्रणम्य महिषो महामायां जगन्मयीम् ।
उवाचेदं वचो नम्रमूर्त्तिर्भक्तियुतोऽसुरः ॥
महिष उवाच ।
देवि ! खड्गेन संछिद्य शोणितानि शिरो मम ।
त्वया भुक्तानि दृष्टानि मया स्वप्ने सुनिश्चितम् ॥
अवश्यं तत्त्वया कार्य्यं मया ज्ञातं प्रमाणतः ।
एतद्रुधिरपानं मे तत्रैकं देहि मे वरम् ॥
वध्यस्त्वयाहं नात्रास्ति संशयः परमेश्वरि ! ।
ममापि तत्र नो दुःखं नियतिः केन लङ्घ्यते ॥
किन्तु त्वयैव सहितः शम्भुराराधितः पुरा ।
मम पित्रा मदर्थेन जातः पश्चादहं ततः ॥
मयाप्याराधितः शम्भुः प्राप्तास्तेऽस्तथा वराः ।
मन्वन्तरत्रयं यावदासुरं राज्यमुत्तमम् ।
चकराटकं मया भुक्तमनुतापो न विद्यते ॥
कात्यायनेन मुनिना शप्तोऽहं शिष्यकारणात् ।
सीमन्तिनी विनाशं ते करिष्यति न संशयः ॥
पुरा मुनिं तपस्यन्तं रौद्राश्वं नाम चोत्तमम् ।
मुनेः कात्यायनाख्यस्य शिष्यं हिमवदन्तिके ॥
दिव्यस्त्रीरूपमतुलं कृत्वाहं कौतुकात्तदा ।
मया संमोहितो विप्रोऽत्यजन्मूढ़स्तदा तपः ॥
न दूरात् संस्थितेनाहं मुनिना कात्यसूनुना ।
ज्ञात्वा मायां तदा शप्तः शिष्यार्थे क्रोधवह्निना ॥
यस्मात्त्वया मे शिष्योऽयं मोहितस्तपसश्च्युतः ।
अतस्त्वया स्त्रीरूपेण तत्त्वां स्त्री हनिष्यति ॥
इति मां शप्तवान् पूर्व्वं मुनिः कात्यायनः पुरा ।
तस्य शापस्य कालोऽयमागत्य समुपस्थितः ॥
देवेन्द्रत्वं मया प्राप्तं भुक्तं त्रिभुवनं समम् ।
किञ्चिन्न शोच्यं तत्रास्ति वाञ्छनीयं हि यन्मया ॥
तस्मात्त्वां वै प्रपन्नोऽहं प्रार्थ्यं शेषं हि यन्मया ।
तद्देहि देवि दुर्गे ! त्वं भूयस्तुभ्यं नमो नमः ॥
श्रीदेव्युवाच ।
"प्रार्थनीयो वरो यस्ते तं वृणु त्वं महासुर ! ।
दास्यामि ते वरं प्रार्थ्यं संशयो नात्र विद्यते ॥"
महिष उवाच ।
"यज्ञभागमहं भोक्तुमिच्छामि त्वत्प्रसादतः ।
यथा यज्ञेषु सर्व्वेषु पूज्योऽहं स्यां तथा कुरु ॥
त्वत्पादसेवां न त्यक्ष्ये यावत् सूर्य्यः प्रवर्त्तते ।
एवं वरद्वयं देहि यदि देयो वरो मम ॥"
श्रीदेव्युवाच ।
"यज्ञभागाः सुरेभ्यश्च कल्पिता वै पृथक्
पृथक् ।
भागो न विद्यते चान्यो यद्दास्यामि तवाधुना ॥
किन्तु त्वयि मया युद्धे निहते महिषासुर ! ।
नैव त्यक्ष्यसि मत्पादं सततं नात्र संशयः ॥
मम प्रवर्त्तते पूजा यत्र यत्र च तत्र ते ।
पूज्यश्चिन्त्यश्च तत्रैव कायोऽयं तव दानव ! ॥
इति श्रुत्वा वचस्तस्याः प्रत्यूचे महिषासुरः ।
वरं प्रार्थ्येह मुदितः प्रसन्नवदनस्तदा ॥
उग्रचण्डे ! भद्रकालि ! दुर्गे देवि ! नमोऽस्तु ते ।
प्रभूता मूर्त्तयो देवि ! भवत्याः सकलात्मिकाः ॥
काभिस्ते मूर्त्तिभिः पूज्यो यज्ञेऽहं परमेश्वरि ! ।
तत् समाचक्ष्व यदि मे भवत्येह कृपा कृता ॥"
श्रीदेव्युवाच ।
"यानि नामानि चोक्तानि त्वयेह महिषासुर ! ।
तासु मूर्त्तिषु संस्पृष्टः पूज्यो लोके भविष्यति ॥
उग्रचण्डेति या मूर्त्तिर्भद्रकाली ह्यहं पुनः ।
यया मूर्त्त्या त्वां हनिष्ये सा दुर्गेति प्रकीर्त्तिता ॥
एतासु मूर्त्तिषु सदा पादलग्नो नृणां सदा ।
पूज्यो भविष्यसि त्वं वै देवानामपि रक्षसाम् ॥
आदिसृष्ट्या उग्रचण्डामूर्त्त्या त्वं निहतः पुरा ।
द्वितीयसृष्टौ तु भवान् भद्रकाल्या मया हतः ॥
दुर्गारूपेणाधुना त्वां हनिष्यामि सहानुगम् ।
किन्तु पूर्व्वं न गृहीतस्त्वं मया पादयोस्तले ॥
अधुना प्रार्थितवरो गृहीतः पूर्व्वकाययोः ।
गृहीतव्यश्च पश्चात्त्वं यज्ञभागोपभुक्तये ॥"
इति कालिकापुराणे ५९ अध्यायः ॥*॥ गङ्गायाः पश्चिमे तीरे ग्रामविशेषश्च ॥